શ્રીવલ્લભાય નમઃ

# અથ શ્રીનારાયણકવચ

## રાજોવાચ

યયા ગુપ્તઃ સહસ્રાક્ષઃ સવાહાન્ રિપુસૈનિકાન્ ।
ક્રીડન્નીવ વિનિર્જિત્ય ત્રિલોક્યા બુભુજે શ્રિયમ્ ॥૧॥
ભગવંસ્તન્મમાખ્યાહિ વર્મ નારાયણાત્મકમ્ ।
યથાઽઽતતાયિનઃ શત્રૂન યેન ગુપ્તોઽજયન્મૃધે ॥૨॥

## શ્રીશુક ઉવાચ

વૃતઃ પુરોહિતસ્ત્વાષ્ટ્રો મહેન્દ્રાયાનુપૃચ્છતે ।
નારાયણાખ્યં વર્માહ તદિહૈકમનાઃ શૃણુ ॥૩॥

## વિશ્વરૂપ ઉવાચ

ધૌતાઙ્ઘ્રિપાણિરાચમ્ય સપવિત્ર ઉદઙ્મુખઃ ।
કૃતસ્વાઙ્ગકરન્યાસો મન્ત્રાભ્યાં વાગ્યતઃ શુચિઃ ॥૪॥

નારાયણમયં વર્મ સંનહ્યેદ્ ભય આગતે ।
પાદયોર્જાનુનોરૂર્વોરુદરે હૃદ્યથોરસિ ॥૫॥

મુખે શિરસ્યાનુપૂર્વ્યાદોંકારાદીનિ વિન્યસેત્ ।
ૐ નમો નારાયણાયેતિ વિપર્યયમથાપિ વા ॥૬॥

કરન્યાસં તતઃ કુર્યાદ્ દ્વાદશાક્ષરવિદ્યયા ।
પ્રણવાદિયકારાન્તમઙ્ગુલ્યઙ્ગુષ્ઠપર્વસુ ॥૭॥

ન્યસેદ્ધૃદય ઓંકારં વિકારમનુ મૂર્ધનિ ।
ષકારં તુ ભ્રુવોર્મધ્યે ણકારં શિખયા દિશેત ॥૮॥

વેકારં નેત્રયોર્યુંજ્જયાન્નકારં સર્વસન્ધિષુ ।
મકારમસ્ત્રમુદ્દિશ્ય મન્ત્રમૂર્તિર્ભવેદ્ બુધઃ ॥ ૯॥

સવિસર્ગં ફડન્તં તત્ સર્વદિક્ષુ વિનિર્દિશેત્ ।
ૐ વિષ્ણવે નમ ઇતિ ॥ ૧૦॥

આત્માનં પરમં ધ્યાયેદ્ ધ્યેયં ષટ્શક્તિભિર્યુતમ્ ।
વિદ્યાતેજસ્તપોમૂર્તિમિમં મન્ત્રમુદાહરેત્ ॥૧૧॥

ૐ હરિર્વિદધ્યાન્મમ સર્વરક્ષાં
ન્યસ્તાઙ્ઘ્રિપદ્મઃ પતગેન્દ્રપૃષ્ઠે ।

દરારિચર્માસિગદેષુચાપ-
પાશાન્ દધાનોઽષ્ટગુણોઽષ્ટબાહુઃ ॥૧૨॥

જલેષુ માં રક્ષતુ મત્સ્યમૂર્તિ-
ર્યાદોગણેભ્યો વરુણસ્ય પાશાત્ ।

સ્થલેષુ માયાવટુવામનોઽવ્યાત્
ત્રિવિક્રમઃ ખેઽવતુ વિશ્વરૂપઃ ॥૧૩॥

દુર્ગેષ્વટવ્યાજિમુખાદિષુ પ્રભુઃ
પાયાન્નૃસિંહોઽસુરયૂથપારિઃ ।

વિમુઞ્ચતો યસ્ય મહાટ્ટહાસં
દિશો વિનેદુર્ન્યપતંશ્ચ ગર્ભાઃ ॥૧૪॥

રક્ષત્વસૌ માધ્વનિ યજ્ઞકલ્પઃ
સ્વદંષ્ટ્રયોન્નીતધરો વરાહઃ ।

રામોઽદ્રિકૂટેષ્વથ વિપ્રવાસે
સલક્ષ્મણોઽવ્યાદ્ ભરતાગ્રજોઽસ્માન્ ॥૧૫॥

માઉગ્રધર્માદખિલાત્ પ્રમાદા-
નારાયણઃ પાતુ નરશ્ચ હાસાત્ |

દત્તસ્ત્વયોગાદથ યોગનાથઃ
પાયાદ્ ગુણેશઃ કપિલઃ કર્મબન્ધાત્ ||૧૬||

સનત્કુમારોઽવતુ કામદેવા-
દ્ધયશીર્ષા માં પથિ દેવહેલનાત્
દેવર્ષિવર્યઃ પુરૂષાર્ચનાન્તરાત્
કૂર્મો હરિર્માં નિરયાદશેષાત્ ||૧૭||

ધન્વન્તરિર્ભગવાન્ પાત્વપથ્યાદ્
દ્વન્દ્વાદ્ ભયાદૃષભો નિર્જિતાત્મા |

યજ્ઞશ્ચ લોકાદવતાજ્જનાન્તાદ્
બલો ગણાત્ ક્રોધવશાદહીન્દ્રઃ ||૧૮||

દ્વૈપાયનો ભગવાનપ્રબોધાદ્
બુદ્ધસ્તુ પાખન્ડગણાત્ પ્રમાદાત્ |

કલ્કિઃ કલેઃ કાલમલાત્ પ્રપાતુ
ધર્માવનાયોરૂકૃતાવતારઃ ||૧૯||

માં કેશવો ગદયા પ્રાતરવ્યાદ્
ગોવિન્દ આસઙ્ગવમાત્તવેણુઃ |

નારાયણઃ પ્રાહ્ણ ઉદાત્તશક્તિ-
ર્મધ્યન્દિને વિષ્ણુરરીન્દ્રપાણિઃ ||૨૦||

દેવોઽપરાહ્ણે મધુહોગ્રધન્વા
સાયં ત્રિધામાવતુ માધવો મામ્ |

દોષે હૃષીકેશ ઉતાર્ધરાત્રે
નિશીથ એકોઽવતુ પદ્મનાભઃ ॥૨૧॥

શ્રીવત્સધામાપરરાત્ર ઈશઃ
પ્રત્યૂષ ઈશોઽસિધરો જનાર્દનઃ ।

દામોદરોઽવ્યાદનુસન્ધ્યં પ્રભાતે
વિશ્વેશ્વરો ભગવાન્ કાલમૂર્તિઃ ॥૨૨॥

ચક્રં યુગાન્તાનલતિગ્મનેમિ
ભ્રમત્ સમન્તાદ્ ભગવત્પ્રયુક્તમ્ ।

દન્દગ્ધિ દન્દગ્ધ્યરિસૈન્યમાશુ
કક્ષં યથા વાતસખો હુતાશઃ ॥૨૩॥

ગદેઽશનિસ્પર્શનવિસ્ફુલિઙ્ગે
નિષ્પિણ્ઢિ નિષ્પિણ્ઢ્યજિતપ્રિયાસિ ।

કુષ્માણ્ડવૈનાયકયક્ષરક્ષો-
ભૂતગ્રહાંશ્ચૂર્ણય ચૂર્ણયારીન્ ॥૨૪॥

ત્વં યાતુધાનપ્રમથપ્રેતમાતૃ-
પિશાચવિપ્રગ્રહઘોરદૃષ્ટીન્ ।

દરેન્દ્ર વિદ્રાવય કૃષ્ણપૂરિતો
ભીમસ્વનોઽરેર્હૃદયાનિ કમ્પયન્ ॥૨૫॥

ત્વં તિગ્મધારાસિવરારિસૈન્ય-
મીશપ્રયુક્તો મમ છિન્દ્ધિ છિન્દ્ધિ ।

ચક્ષૂંષિ ચર્મઞ્છતચન્દ્ર છાદય
દ્વિષામઘોનાં હર પાપચક્ષુષામ્ ||૨૬||

યન્નો ભયં ગ્રહેભ્યોઽભૂત્ કેતુભ્યો નૃભ્ય એવ ચ |
સરીસૃપેભ્યો દંષ્ટ્રિભ્યો ભૂતેભ્યોઽંહોભ્ય એવ વા ||૨૭||

સર્વાણ્યેતાનિ ભગવન્નામરૂપાસ્ત્રકીર્તનાત્ |
પ્રયાન્તુ સંક્ષયં સદ્યો યે નઃ શ્રેયઃ પ્રતીપકાઃ ||૨૮||

ગરૂડો ભગવાન્ સ્તોત્રસ્તોભશ્છન્દોમયઃ પ્રભુઃ |
રક્ષત્વશેષકૃચ્છ્રેભ્યો વિષ્વક્સેનઃ સ્વનામભિઃ ||૨૯||

સર્વાપદ્ભ્યો હરેર્નામરૂપયાનાયુધાનિ નઃ |
બુદ્ધિન્દ્રિયમનઃ પ્રાણાન્ પાન્તુ પાર્ષદભૂષણાઃ ||૩૦||

યથા હિ ભગવાનેવ વસ્તુતઃ સદસચ્ચ યત્ |
સત્યેનાનેન નઃ સર્વે યાન્તુ નાશમુપદ્રવાઃ ||૩૧||

યથૈકાત્મ્યાનુભાવાનાં વિકલ્પરહિતઃ સ્વયમ્ |
ભૂષણાયુધલિઙ્ગાખ્યા ધત્તે શક્તીઃ સ્વમાયયા ||૩૨||

તેનૈવ સત્યમાનેન સર્વજ્ઞો ભગવાન હરિઃ |
પાતુ સર્વૈઃ સ્વરૂપૈર્નઃ સદા સર્વત્ર સર્વગઃ ||૩૩||

વિદિક્ષુ દિક્ષૂર્ધ્વમધઃ સમન્તા-
દન્તર્બહિર્ભગવાન નારસિંહઃ |

પ્રહાપયઁલ્લોકભયં સ્વનેન
સ્વતેજસા ગ્રસ્તસમસ્તતેજઃ ||૩૪||

મઘવન્નિદમાખ્યાતં વર્મ નારાયણાત્મકમ્ |
વિજેષ્યસ્યઞ્જસા યેન દંશિતોઽસુરયૂથપાન્ ||૩૫||

એતદ્ ધારયમાણસ્તુ યં યં પશ્યતિ ચક્ષુષા |
પદા વા સંસ્પૃશેત્ સદ્યઃ સાધ્વસાત્ સ વિમુચ્યતે ||૩૬||

ન કુતશ્ચિદ્ ભયં તસ્ય વિદ્યાં ધારયતો ભવેત્ |
રાજદસ્યુગ્રહાદિભ્યો વ્યાઘ્રાદિભ્યશ્ચ કર્હિચિત્ ||૩૭||

ઇમાં વિદ્યાં પુરા કશ્ચિત્ કૌશિકો ધારયન્ દ્વિજઃ |
યોગધારણયા સ્વાઙ્ગં જહૌ સ મરુધન્વનિ ||૩૮||

તસ્યોપરિ વિમાનેન ગન્ધર્વપતિરેકદા |
યયૌ ચિત્રરથઃ સ્ત્રીભિર્વૃતો યત્ર દ્વિજક્ષયઃ ||૩૯||

ગગનાન્ન્યપતત્ સદ્યઃ સવિમાનો હ્યવાક્શિરાઃ |
સ વાલખિલ્યવચનાદસ્થીન્યાદાય વિસ્મિતઃ |
પ્રાસ્ય પ્રાચીસરસ્વત્યાં સ્નાત્વા ધામ સ્વમન્વગાત્
||૪૦||

શ્રી શુક ઉવાચ

ય ઇદં શૃણુયાત્ કાલે યો ધારયતિ ચાદૃતઃ |
તં નમસ્યન્તિ ભૂતાનિ મુચ્યતે સર્વતો ભયાત્
||૪૧||

એતાં વિદ્યામધિગતો વિશ્વરૂપાચ્છતક્રતુઃ |
ત્રૈલોક્યલક્ષ્મીં બુભુજે વિનિર્જિત્ય મૃધેઽસુરાન્ ||૪૨||

| ઇતિ શ્રીનારાયણકવચં સમ્પૂર્ણમ્ |

આ પાઠ કરવા માટે જલનું પાત્ર ભરીને તેમાં જમણા હાથની એક આંગળી રાખીને પૂરો નારાયણકવચ કરવો અને પાઠ થયા પછી જલ લઈ લેવું.

આ નારાયણ કવચનો નિત્ય પાઠ કરવાથી ધન, યશ અને સંપત્તિમાં અભિવૃદ્ધિ થાય છે. અને સ્વાસ્થ્ય પણ સારૂ રહે છે.